नं० ११५६-घ

१ पंचीकरणवार्तिकम् (वेदान्त शास्त्रम्)

२ निरञ्जनाष्टकम्

पत्र ३

पत्राणि ३ (सम्पूर्णम्)

नं० ११५६-घ

कर्त्ता सुरेश्वराचार्यः

श्रीगणेशायनमः ॐकारःसर्ववेदानांसारस्तत्वप्रकाशकः तेनचित्तसमा
धानंमुमुक्षूणांप्रकाश्यते १ आसीदेकंपरंब्रह्मनित्यमुक्तमविक्रियं तत्स्व
मायासमावेशाद्बीजमव्याकृतात्मकं २ तस्मादाकाशमुत्पन्नंशब्दतन्मात्र
रूपकं स्पर्शात्मकस्ततोवायुस्तेजोरूपात्मकंततः ३ आपोरसात्मिकास्त
स्मात्ताभ्योगंधात्मिकामही शब्दैकगुणमाकाशंशब्दस्पर्शगुणोमरुत् ४
शब्दस्पर्शरूपगुणैस्त्रिगुणंतेजउच्यते शब्दस्पर्शरूपरसगुणैरापश्चतु
र्गुणाः ५ शब्दस्पर्शरूपरसगंधैःपंचगुणामही तेभ्यःसमभवत्सूत्रंलिंगं
सर्वात्मकंमहत् ६ ततःस्थूलानिभूतानिपंचतेभ्योविराडभूत् पंचीकृता
निभूतानिस्थूलानीत्युच्यतेबुधैः ७ पृथिव्यादीनिभूतानिप्रत्येकंविभजे
द्विधा एकैकंभागमादायचतुर्धाविभजेत्पुनः ८ एकैकंभागमेकस्मिन्
भूतेसंवेशयेत्क्रमात् ततश्चाकाशभूतस्यभागाःपंचभवंतिहि ९ वाय्वा
दिभागाश्चत्वारोवाय्वादिष्वेवमादिशेत् पंचीकरणमेतत्स्यादित्याहुस्तत्व
वेदिनः १० पंचीकृतानिभूतानितत्कार्यंचविराड्भवेत् स्थूलंशरीरमे
तत्स्यादशरीरस्यचात्मनः ११ अधिदैवतमध्यात्ममधिभूतमितित्रि
धा एकंब्रह्मविभागेनभ्रमाद्भातिनतत्वतः १२ इंद्रियैरर्थविज्ञानंदेवता
नुग्रहान्वितैः शब्दादिविषयंज्ञानंतज्जागरितमुच्यते १३ श्रोत्रमध्यात्म

मित्युक्तं श्रोतव्यं शब्दलक्षणं अधिभूतं तदित्युक्तं दिशस्तत्राधिदैवतं १४॥
त्वगध्यात्ममिति प्रोक्तं स्प्रष्टव्यं स्पर्शलक्षणं अधिभूतं तदित्युक्तं वायुस्तत्रा
धिदैवतं १५ चक्षुरध्यात्ममित्युक्तं द्रष्टव्यं रूपलक्षणं अधिभूतं तदित्यु
क्तमादित्यो ऽत्राधिदैवतं १६ जिह्वाध्यात्मं तथा स्वाद्यमधिभूतं रसात्मकं व
रुणो देवता तत्र जिह्वायामधिदैवतं १७ घ्राणमध्यात्ममित्युक्तं घ्रातव्यं ग
न्धलक्षणं अधिभूतं तदित्युक्तं पृथिव्यत्राधिदैवतं १८ वागध्यात्ममिति
प्रोक्तं वक्तव्यं तत्र यद्भवेत् अधिभूतं तदित्युक्तमग्निस्तत्राधिदैवतं १९
हस्तावध्यात्ममित्युक्तमादानं तत्र यद्भवेत् अधिभूतं तदित्युक्तमिंद्रस्तत्रा
धिदैवतं २० पादावध्यात्ममित्युक्तं गंतव्यं तत्र यद्भवेत् अधिभूतं तदि
त्युक्तं विष्णुस्तत्राधिदैवतं २१ पायुरध्यात्ममित्युक्तं विसर्गस्तत्र यो भ
वेत् अधिभूतं तदित्युक्तं मृत्युस्तत्राधिदैवतं २२ उपस्थेंद्रियमध्यात्मं स्त्रि
याधानंदकारणं अधिभूतं तदित्युक्तमधिदैवं प्रजापतिः २३ मनोध्या
त्ममिति प्रोक्तं मंतव्यं तत्र यद्भवेत् अधिभूतं तदित्युक्तं चंद्रस्तत्राधिदैवतं
२४ बुद्धिरध्यात्ममित्युक्तं बोद्धव्यं तत्र यद्भवेत् अधिभूतं तदित्युक्तमधि
दैवं प्रजापतिः २५ अहंकारस्तथाध्यात्ममहंकर्तव्यमेव च अधिभूतं त १
दित्युक्तं रुद्रस्तत्राधिदैवतं २६ चित्तमध्यात्ममित्युक्तं चेतव्यं तत्र यद्भवेत्

अधिभूतं तदित्युक्तं क्षेत्रज्ञोत्राधिदैवतं २७ तमो ध्यात्ममिति प्रोक्तं विकारस्तत्र
योभवेत् अधिभूतं तदित्युक्तमीश्वरोत्राधिदैवतं २८ बाह्यांतःकरणैरेवं देव
तानुग्रहान्वितैः स्वंस्वं च विषयं ज्ञानं तज्जागरितमुच्यते २९ येयं जागरिता
वस्था शरीरं करणात्मयं यस्तयोरभिमानी स्याद्विश्व इत्यभिधीयते ३०
विश्वं वैराजरूपेण पश्येद्भेदनिवृत्तये ज्ञानेंद्रियाणि पंचैव पंचकर्मेंद्रिया
णि च ३१ श्रोत्रं त्वग्नयनं घ्राणं जिह्वा धीन्द्रियपंचकं वाक्पाणिपादपायू
पस्थाः कर्मेंद्रियाणि पंचकं ३२ मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयं संक
ल्पाख्यं मनो रूपं बुद्धिर्निश्चयरूपिणी ३३ अभिमानात्मकस्तद्वदहंकारः
प्रकीर्तितः अनुसंधानरूपं च चित्तमित्यभिधीयते ३४ प्राणोपानस्तथा व्या
न उदानाख्यस्तथैव च समानश्चेति पंचैताः कीर्तिताः प्राणवृत्तयः ३५ एवं
वायवग्न्यं बुद्धितयो भूतसूक्ष्माणि पंच च अविद्याकामकर्माणि लिंगपुर्यष्ट
कं विदुः ३६ एतत्सूक्ष्मशरीरस्यात्मायिकं प्रत्यगात्मनं करणोपरमे जाग्रत्
संस्कारोत्थप्रबोधवत् ३७ ग्राह्यग्राहकरूपेण स्फुरणं स्वप्न उच्यते अभि
मानी तयोर्यस्तु तैजसः परिकीर्तितः ३८ हिरण्यगर्भरूपेण तैजसं परिकी
र्तितः चैतन्याभासखचितं शरीरद्वयकारणं ३९ आत्माज्ञानं तदव्यक्तमव्या
कृतमितीर्यते न सन्नासन्न सदसद्भिन्नाभिन्नं न चात्मनः ४० न साभागं न

निर्भागेन चाप्युभयस्वरूपकं अत्रात्मैकत्वविज्ञानाद्द्वयं मिथ्यात्वकारणात् ४१
ज्ञानानामुपसंहारो बुद्धेः कारणतां स्थितिः वटबीजे वटस्येव सुषुप्तिरभिधीय
2 ते ४२ अभिमानी तयोर्यस्तु प्राज्ञ इत्यभिधीयते जगत्कारणरूपेण प्राज्ञात्मा
नं विचिंतयेत् ४३ विश्वतैजससौषुप्तविराट्सूत्राक्षरात्मभिः विभिन्नमि
व संमोहादेकं तत्त्वं त्रयात्मकं ४४ विद्यादिकं त्रयं यस्माद्वैराजादित्रयात्मकं
एकत्वेनैव संपश्येदन्याभावप्रसिद्धये ४५ ओंकारमात्रमखिलं विश्वप्राज्ञा
दिलक्षणं वाच्यवाचकताभेदाद्भेदनानुपलब्धितः ४६ अकारमात्रं विश्वं
स्यादुकारस्तैजसः स्मृतः प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु ४७ स
माधिकालात्प्रागेव विचिंत्यातिप्रयत्नतः स्थूलं सूक्ष्मं क्रमात्सर्वं चिदात्म
नि विलापयेत् ४८ अकारं पुरुषं विश्वमुकारे प्रविलापयेत् उकारं तै
जसं सूक्ष्मं मकारे प्रविलापयेत् ४९ मकारं कारणं प्राज्ञं चिदात्मनि विला
पयेत् चिदात्माहं नित्यशुद्धबुद्धमुक्तसदाद्वयः ५० परमानंदसंदोहवासुदे
वोहमोमिति ज्ञात्वा विवेचकं चित्तं तत्साक्षिणि विलापयेत् ५१ चिदात्मनि
विलीनं चेत्तच्चित्तं न विचालयेत् पूर्णबोधात्मनासीन पूर्णाचलसमुद्रवत्
५२ एवं समाहितो योगी श्रद्धाभक्तिसमन्वितः जितेंद्रियो जितक्रोधः पश्ये २
दात्मानमव्ययं ५३ आदिमध्यावसानेषु दुःखं सर्वमिदं यतः तस्मात्सर्वंप

रित्यज्य तत्स्थानिष्ठो भवेत्सदा ५४ यः पश्येत्सर्वगं शांतमानंदात्मानमद्वयं न तेन
किंचिदाप्तव्यं ज्ञातव्यं नावशिष्यते ५५ कृतकृत्यो भवेद्विद्वान्जीवन्मुक्तो भवेत्स
दा कदाचिद्व्यवहारे तु द्वैतं यद्यपि पश्यति ५६ बोधात्मव्यतिरेकेण न पश्यति
3 चिदन्वयात् किंतु पश्यति मिथ्यैव दिङ्मोहेंदुविभागवत् ५७ प्रतिभासः
शरीरस्य तदाप्रारब्धसंक्षयात् तस्य तावदेव चिरमित्यादिश्रुतिरब्रवीत् ५८
प्रारब्धस्यानुवृत्तिस्तु मुक्तस्याभासमात्रतः सर्वदा मुक्त एव स्यात् ज्ञाननिष्ठः
पुमानसौ ५९ प्रारब्धभोगशेषस्य संक्षये तदनंतरं अविद्यातिमिरातीतं
सर्वाभासविवर्जितं ६० आनंदममलं शुद्धं मनोवाचामगोचरं वाच्यवाचक
निर्मुक्तं हेयोपादेयवर्जितं ६१ प्रज्ञानघनमानंदं वैष्णवं पदमश्नुते इदं प्र
करणं यत्नाज्ज्ञातव्यं भागवत्तमैः ६२ अमानित्वादिनियमैर्गुरुभक्तिप्रसा
दतः इमां विद्यां प्रयत्नेन योगी संध्यासु सर्वदा ६३ समभ्यसेदिहामुत्रभो
गानासक्तसुधीः सुधीः रागद्वेषादिरहितो स्वात्मानं चिंतयेत्सदा ६४ इति
श्रीसुरेश्वराचार्यविरचितं पंचीकरणवार्त्तिकं समाप्तं शुभं भवतु राम
आदौ तावदृग्वेदस्य प्रज्ञानमानंदं ब्रह्मेति अहं ब्रह्मास्मीति यजुर्वेदस्य तत्त्वमसी
ति सामवेदस्य अयमात्मा ब्रह्मेति अथर्वणवेदस्य वाक्यं अहं ब्रह्मास्मि यत्परं २
ब्रह्मेति श्रुतिः इति चतुर्दश महावाक्ये ब्रह्मविचारः शुभमस्तु ॐ नमः शिवाय

नि० श्रीगणेशायनमः श्रीगुरुचरणकमलेभ्योन्नमः ओम् स्थानंनमानंनचा
नादविंदरूपंनरेषानचधातुवर्णं दृष्टंनदृश्यंश्रवणंनश्राव्यंतस्मैनमोब्रह्म
निरंजनाय १ वृक्षोनमूलंनचबीजकूलंशाखानपत्रंनचस्कंधबंधं पुष्पं
नगंधंनफलंनछायातस्मैनमो० २ वेदंनशास्त्रंनचसोचसंध्यामोनंनजा
प्यंनचध्यानध्येयं होमंनयज्ञंनचदेवपूजातस्मैनमोब्र० ३ अधोनउर्ध्वं
नशिवोनशक्तिप्रमान्ननारीनचलिंगमूर्त्ति ब्रह्मानविष्णूनचदेवरुद्रोत
स्मैनमोब्र० ४ अखंडखंडंनचरुद्रकाकालोनजीवोनगुरूर्नशिष्यः ग्र
हंनतारानचमेघमालातस्मैनमोब्रह्म० ५ श्वेतंनपीतंनचरेतरक्तं हेमं
नरूपंनचवर्णवर्णं चंद्रोनवन्हिउदयोनअस्तंतस्मैनमो० ६ स्वर्गेनदे
वोनरकेनजंतुजातानतीतंनचभेदभिन्नं अहंनचैतन्यपृथकपृथकचा
तस्मैनमोब्र० ७ गंभीरधीरंनचवर्णभून्यंसंसारसारंनचपापपुण्यं
व्यापत्यमाव्यत्यनभीमभीमंतस्मैनमोब्रह्मनिरंजनाय ८ इतिश्रीमत्
शंकराचार्यविरचितंनिरंजनाष्टकस्तोत्रसंपूर्णं शुभंभवतु नारायण